दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-231 | 1 | जून 13, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णत्रयोदशी
ज्येष्ठ 30 प्रविष्टांशः मङ्गलमयः भवेत्

2 दक्षिणकोरियादेशस्य विजयिनः आरम्भः, ह्वांग इनबोम-महोदयेन विजयी गोलः दत्तः, चेकगणराज्यं २-१ इति अङ्कक्रमेण पराजितम्

3 मोदी-सर्वकारस्य द्वादशवर्षेषु हिमाचलाय प्राप्ता विकासस्य नवीना गतिः- जगत प्रकाश नड्डा

4 हिमाचलस्य ७४ 'पीएम श्री' विद्यालयेषु मुक्तव्यायामशालाः निर्मास्यन्ते, अध्ययनेन सह स्वास्थ्ये अपि ध्यानं दास्यन्ति छात्राः

# प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत्, राष्ट्रनिर्माणस्य पूर्णक्षमतायाः साक्षात्काराय गत द्वादश-वर्षेषु सर्वकारेण महिलाभ्यः अनुकूलं वातावरणम् निर्मितम्



प्रधानमन्त्री नरेन्द्रमोदी गतदिने अवदत् यत् वित्तीयसमावेशे उद्यमशीलता इत्यतः आरभ्य शिक्षा, स्वास्थ्यसेवा, स्वच्छता, गृहनिर्माण-क्रीडा-विज्ञानं प्रशासनञ्च यावत् विविधेषु क्षेत्रेषु महिलाः प्रमुखां भूमिकां निर्वहन्त्यः सन्ति। सामाजिक-प्रसार-माध्यमे श्रीमोदी अवदत् यत् ड्रोन-तन्त्रज्ञानमित्यादिषु उदयोन्मुखक्षेत्रेषु महिलानां वर्धमान सहभागित्वेन अवसरस्य नूतनाः मार्गाः उद्घाट्यन्ते सम्पूर्ण देशे च विकास-परिदृश्यं परिवर्तते। तत्पूर्वं एकस्मिन् कार्यक्रमे भाषमाणः प्रधानमन्त्री अवदत् यत् गत द्वादशवर्षेषु एन्. डी. ए. इत्यस्य सर्वकारः महिलानां नेतृत्वे विकासकार्यम् अकरोत्, एतच्च अन्येषु क्षेत्रेष्वपि दृश्यते। प्रधानमन्त्री नरेन्द्रमोदी इत्यपि अवदत् यत् सर्वकारः याः महिलाः आर्थिकरूपेण स्वतन्त्राः भवितुं दीर्घकालं यावत् प्रयतन्त्यः आसन्, ताः स्वसहायता समूहान् सक्रियतया समर्थयन्ति। प्रधानमन्त्री इतोऽपि अधोरेखितवान् यत् सर्वकारस्य प्रयत्नाः मर्यादायां, अवसरेषु, सशक्तीकरणे च निहिताः सन्तीति।

## जून्-मासस्य चतुर्दशदिनाङ्के फ्रान्स्-देशस्य नीस-नगरं गमिष्यति प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी जून्-मासस्य चतुर्दशदिनाङ्के फ्रान्स्-देशस्य नीस-नगरं गमिष्यति, तदैव फ्रान्स-स्लोवाकिया-देशयोः द्वयोः राष्ट्रयोः यूरोपीययात्रायाः प्रथमः चरणः भविष्यति। अस्मिन् वर्षे फरवरी-मासे द्वयोः राष्ट्रयोः सम्बन्धः विशेष-वैश्विक-सामरिक-सहभागित्वरूपेण वर्धितस्यानन्तरं राष्ट्रपतिना इम्मैनुयल मैक्रों इत्यनेन सह एतत् तस्य प्रथमं द्वैपाक्षिकं शिखरसम्मेलनं भविष्यति। अतः अस्याः यात्रायाः विशेष महत्त्वं वर्तते। एवियन नगरे जी-7 शिखरसम्मेलने भागं ग्रहीतुं फ्रान्स्-देशं प्रत्यागमनात् प्राक्, नीस-नगरात् श्रीमोदी स्लोवाकिया-देशं गमिष्यति, यत्र भारतं दक्षिणविश्वेत्यस्य प्रमुखस्वररूपेण भागं ग्रहीष्यति।

## सुभाषितम्

**छिन्नोऽपि रोहति तरुश्चन्द्रः, क्षीणोऽपि वर्धते लोके।**
**इति विमृशन्तः सन्तः, संतप्यन्ते न लोकेऽस्मिन्।।**

अर्थात्- वृक्षों को काट कर छोटा कर दिए जाने पर भी तथा चन्द्रमा का अपना आकार छोटा हो जाने पर भी वे पुनः वृद्धि प्राप्त कर लेते हैं। इसी तथ्य को ध्यान में रखते हुए साधु और सन्त समाज में किसी को भी दुःख नहीं देते हैं और सदैव सब की भलाई के लिए प्रयत्नशील रहते हैं।







## संयुक्तराष्ट्रसङ्घः ओमान्-देशस्य तटे तैल-नौकास्थानां भारतीय-नाविकानामुपरि कृताक्रमणानां निन्दामरोत्

विदेशमन्त्रालयेन संयुक्तराज्यामेरिकादेशस्य चार्ज डी अफेयर्स जेसन् मीक्स् इत्यमुम् आहूय ओमान-तटे वाणिज्यिकनौकायाम् आक्रमणस्य विरोधः प्रकटितः। परह्यः विंशति भारतीय कर्मचारिभिः सह एकस्याम् अन्यस्यां नौकायाम् आक्रमणम् अभवत्। अमेरिकी राजदूतः नवदिल्ल्यां विदेशमन्त्रालयस्य अपरसचिवेन आहूतः। अयं द्वितीयः अवसरः अस्ति, यदा अमेरिका-देशस्य राजदूतः मन्त्रालयेन आहूतः। प्रारम्भे लुप्ताः इति सूचिताः त्रयः भारतीय-नाविकाः एकस्मिन् आक्रमणे मृताः इति दृढीकृतम्।

## भारतीयस्य दिग्गज लक्ष्यभेदनस्पर्धायाः क्रीडकस्य प्रशिक्षकस्य च जसपाल राणा इत्यस्य एकोनपञ्चाशत्तमे वयसि मृत्युः अभवत्

प्रसिद्धः भारतीयः लक्ष्यभेदनस्पर्धा-प्रशिक्षकः क्रीडकश्च पूर्व-एशियन्-गेम्स् स्वर्णपदकविजेता जसपाल राणा दिवङ्गतः। सः एकोनपञ्चाशत् वर्षीयः आसीत्। भारतीय-राष्ट्रिय-रायफ़ल-सङ्घस्य अध्यक्ष-कलिकेश-नारायण-सिङ्ह-देवस्य अनुसारं, श्रीराणा गतरात्रौ दिल्ल्याः चिकित्सालये अन्तिमं श्वासम् अगृह्णात्। राष्ट्रपतिः द्रौपदी मुर्मुः, प्रधानमन्त्री नरेन्द्रमोदी इत्यादयः नेतारः जसपाल राणा वर्यस्य निधने शोकं प्रकटितवन्तः ।

## गृहमन्त्री अमितशाहः नवदेहली-नगरे श्री-अमरनाथ-यात्रायाः सज्जतायाः समीक्षार्थं उच्च-स्तरीयोपवेशनस्य अध्यक्षः अभवत्



केन्द्रीय-गृह-मन्त्रिणा अमितशाहेन नवदिल्ल्यां श्री-अमरनाथ-यात्रायाः सज्जतायाः समीक्षार्थं उच्च-स्तरीय-सभायाः अध्यक्षता कृता। अस्यां सभायां सेनाध्यक्षः उपेन्द्र द्विवेदी, राष्ट्रिय-सुरक्षा-परामर्शदः अजित डोभालः, जम्मू-कश्मीरस्य उपराज्यपालः मनोज सिन्हा, सी. आर्. पी. एफ्., बी. एस्. एफ्., सी. आई. एस्. एफ., आई. टी. बी. पी. अथ एस्. एस्. बी. इत्यस्य महानिदेशकाः अपि उपस्थिताः आसन्। अमरनाथयात्रा जुलाई मासस्य तृतीय-दिनाङ्कादारभ्य अगस्त-मासस्य अष्टाविंशति दिनाङ्के च समाप्स्यते।

## केन्द्रीयप्रशासनेन उद्योगमुद्दिश्य पेट्रोलपम्प्स् इत्येतेभ्यः पेट्रोल-डीज़ल् इत्येतयोः क्रयणं प्रतिबन्धितम्।

सर्वकारेण संस्थागत-औद्योगिक-वाणिज्यिक ग्राहकेभ्यः खुदरेति-विक्रय-केन्द्रेभ्यः मोटर्-स्पिरिट् इत्याख्यं उच्च-गति-डीज़ल इत्यस्य क्रयणं प्रतिबन्धितमस्ति, सहैव हि तेभ्यः स्वकीय-उपभोक्तृ पम्पाख्येभ्यः विक्रयकेन्द्रेभ्यः स्वकीय-आवश्यकतां प्राप्तुं आदिष्टम्। पश्चिम-एशियादेशे वर्तमान-सङ्कटमभिलक्ष्य वैश्विक आपूर्तिशृङ्खलासु मध्यव्यवधाने स्थानीय-अभावान् निवारयितुं अयं निर्णयः कृतोऽस्ति। एकस्यां अधिसूचनायां पेट्रोलियम-प्राकृतिकगैस इति मन्त्रालयः अवदत् यत् नवति दिवसपर्यन्तम् एते प्रतिबन्धाः प्रवर्तन्ते इति।

## वायव्यभारते आर्द्र-ऋतुः अनुवर्तते, यत्र प्रचण्डवातेन, शिलावृष्ट्या च सह मेघावृष्टेः सम्भावना विद्यते

भारत-ऋतु-विज्ञानविभागः अवदत् यत् अद्य यावत् वायव्यभारते आर्द्र-ऋतुः अनुवर्तते, यत्र प्रचण्डवातेन, शिलावृष्ट्या च सह मेघावृष्टेः सम्भावना विद्यते। ऋतु-विज्ञानविभागानुसारम्, अग्रिम-द्वयोः त्रिषु वा दिनेषु कर्णाटक, तेलङ्गाना, आन्ध्रप्रदेश, पश्चिमबङ्गाल, बिहार, छत्तीसगढ, ओडिशा, झारखण्ड्, उत्तरप्रदेशस्य च केषुचित् भागेषु नैर्ऋत्य-प्रावृटः अग्रे गमनीया परिस्थितिः अनुकूला अस्तीति अनुमितमस्ति।

## राष्ट्रपतिः द्रौपदी मुर्मुः द्विदिवसीय यात्रायां देहरादून-नगरं सम्प्राप्तवती

राष्ट्रपतिः द्रौपदी मुर्मुः गतदिनादारभ्य द्विदिवसीय यात्रायां देहरादून-नगरं सम्प्राप्तवती। उत्तराखण्डस्य राज्यपालेन सेवानिवृत्तेन लेफ्टिनेण्ट जनरल गुरमीत सिंहेन मुख्यमन्त्रिणा पुष्करसिंह धामिना च तस्याः स्वागतं विहितम्। निर्धारितकार्यक्रमानुसारं राष्ट्रपतिः गतदिने देहरादून-नगरस्य राष्ट्रपति-निकेतनं गत्वा द्वात्रिंशोत्तरैकशतम् एकड़ परिमितेषु क्षेत्रेषु विकसितस्य साम्प्रतिक-निर्माण-विकासयोः कार्याणाम् अवलोकनं करिष्यति।

## दक्षिणकोरियादेशस्य विजयिनः आरम्भः, ह्वांग इनबोम-महोदयेन विजयी गोलः दत्तः, चेकगणराज्यं २-१ इति अङ्कक्रमेण पराजितम्




**हिमसंस्कृतवार्ता।** फीफा विश्वकन्दुकक्रीडायां (FIFA World Cup 2026) एकस्मिन् समये एतादृशी स्थितिः आसीत् यथा दक्षिणकोरिया स्वस्य अवसरान् व्यर्थं कृत्वा मूल्यं दास्यति इति प्रतिभाति स्म। दलम् निरन्तरम् आक्रमणं कुर्वत् अवसरान् च निर्माय आसीत्, परन्तु गोलं कर्तुं न समर्थम् अभवत्। तदनन्तरं द्वितीयार्धे चेकगणराज्ये अग्रतां प्राप्य दक्षिणकोरियायाः कृते कठिनतां वर्धितवती। तथापि, ह्वांग इनबोम-महोदयेन प्रथमं समतां प्रापिता, ततः तस्य साहाय्येन ओह ह्योनग्यू-महोदयेन गोलं विधाय दक्षिणकोरियायै विश्वक्रीडायां विजयिनः आरम्भः कारितः। ह्वांग इनबोम-महोदयः 'प्लेयर ऑफ द मैच' इति उपाधिना सम्मानितः। ग्वाडलहारा-क्रीडाङ्गणे आयोजिते अस्मिन् सङ्घर्षे दक्षिणकोरिया प्रथमार्धादेव स्वप्रभुत्वं स्थापितवती। दलेन बहुवारं चेकगणराज्यस्य रक्षापङ्क्तिं (defence) क्लेशितम्, परन्तु गोलरक्षकं माटेज कोवार-महोदयं पराजेतुं न शशाक। कोवार-महोदयेन १४ तमे निमेषे ली कांगिन-महोदयस्य तीव्रं पादप्रहारं सुन्दररीत्या निवारितम्। ५६ तमे निमेषे सोन-महोदयाय पुनः अवसरः प्राप्तः, परन्तु कोवार-महोदयेन तस्य प्रयासः विफलः कृतः।

अनन्तरं ५९ तमे निमेषे क्रीडायाः दिशा सहसा परिवर्तिता। चेकगणराज्यं विपरीतप्रवाहे अग्रतां प्राप्तवती। नायकः लादिस्लाव क्रेजी-महोदयः व्लादिमीर कूफल-महोदयस्य दीर्घं प्रक्षेपं (long throw) प्राप्य सुन्दरं शीर्षप्रहारं (header) कृत्वा कन्दुकं गोलजालं प्रेषितवान्। तथापि, दक्षिणकोरिया पराजयं न स्वीकृतवती। केवलम् अष्ट निमेषानन्तरं ह्वांग इनबोम-महोदयेन शानदाररीत्या समतां प्रापिता। ली कांगिन-महोदयस्य उत्कृष्टं पासं प्राप्य ह्वांग-महोदयः अन्तः गत्वा गोलरक्षकस्य उपरिष्टात् कन्दुकं जालमध्ये प्रेषितवान्। ततः ८० तमे निमेषे ह्वांग-महोदयः पुनः निर्णायकः अभवत्। तस्य दक्षिणपार्श्वतः प्रदत्ते निम्नक्रॉसे (low cross) ओह ह्योनग्यू-महोदयेन गोलं कृत्वा कोरियायै २-१ इति अग्रतां कारिता। अन्तिमनिमेषेषु चेकगणराज्यं समतां प्राप्तुं पूर्णं प्रयत्नं कृतवती, परन्तु दक्षिणकोरियायाः रक्षापङ्क्तिं भेत्तुं न समर्था अभवत्। ८२ तमे निमेषे एडम ह्लोजेक-महोदयस्य प्रहारं किम सेउंगग्यू-महोदयेन सुन्दररीत्या रक्षित्वा चेकगणराज्यस्य अन्तिमम् आशां समाप्तवती।

### फीफा-संस्थया हैती-देशस्य जर्सी-वस्त्रं प्रतिबन्धितम्

फ्लोरिडा। फीफा विश्वक्रीडायाः प्रथमसङ्घर्षे मेक्सिको-देशः दक्षिण-अफ्रीका-देशं पराजितवान्। अस्मिन् समये हैती-देशं स्वस्य प्रथमसङ्घर्षात् पूर्वं जर्सी-वस्त्रं परिवर्तयितुम् आदिष्टम्। हैती-देशस्य क्रीडकाः जून-मासस्य द्वितीये तथा पञ्चमे दिनाङ्के न्यूजीलैण्ड्-पेरू-देशाभ्यां सह विवादितजर्सी-वस्त्रं धृत्वा क्रीडाक्षेत्रम् अवतीर्णाः आसन्। फीफा-निर्देशानुसारम् अस्मिन् परिवर्तने पुष्टिः कृता अस्ति। फ्लोरिडा-नगरे द्वयोः मैत्रीपूर्णसङ्घर्षयोः काले हैती-क्रीडकानां जर्सी-वस्त्रे १८०३ तमे वर्षे 'वर्टिएरेस' (Vertières) युद्धस्य चित्रं राष्ट्रध्वजश्च अङ्कितौ आस्ताम्। फीफा-संस्थायाः आपत्तेः अनन्तरं साएटा (Saeta)-संस्थया अस्मिन् परिवर्तने पुष्टिः कृता।

## भारत-अफगानिस्तानयोः प्रथमः एकदिवसीयसङ्घर्षः धर्मशालायां अद्य दिवा-रात्रिकालीनः (Day-Night) मैच, सार्धैकवादने (1:30) क्रीडाद्वन्द्वः




**हिमसंस्कृतवार्ता।** अन्तरराष्ट्रीयक्रिकेटक्रीडाङ्गणे धर्मशालायां शनिवारे भारत-अफगानिस्तानयोः मध्ये प्रथमः एकदिवसीयप्रतियोगिता (ODI match) कूर्दिष्यते। एकदिवसीयक्रीडासु भारतीयदलस्य पुरतः यद्यपि अफगानिस्तानदेशस्य इतिहासः तावान् विशेषः नास्ति, तथापि अस्य सङ्घर्षस्य रोमाञ्चकः भवितुं पूर्णसम्भावना अस्ति। अपराह्ने सार्धैकवादने (०१:३०) आरभ्यमाणं प्रथमं दिवा-रात्रिकालीनं मैच इति प्रति न केवलं क्रिकेटप्रेमिषु, अपितु क्रीडकेष्वपि महोत्साहः दृश्यते। धर्मशालायां देशस्य विभिन्नेभ्यः भागेभ्यः तथा अफगानिस्तानदेशादपि प्रशंसकाः संसारस्य महान्तः क्रिकेटक्रीडकान् क्रीडाङ्गणे क्रीडतः द्रष्टुं प्राप्नुवन्ति। भूतपूर्वः भारतीयनायकः 'हिटमैन' रोहितशर्मा, वर्तमाननायकः शुभमनगिलः, के.एल. राहुलः, श्रेयस अय्यरः अन्ये च भारतीयताराक्रीडकाः पूर्वमेव धर्मशालां सम्प्राप्ताः, येन क्रिकेटप्रेमिणाम् उत्साहः द्विगुणितः जातः। एचपीसीए (HPCA) संस्थायाः सचिवः मनुजशर्मा अवदत् यत् इन्द्रूनागदेवतायाः आशिषा क्रीडायाः सर्वाः सज्जाः पूर्णीकृताः, एशोसिएशनः च अन्यस्य एकस्य संस्मरणीयस्य अन्तरराष्ट्रीयमैचस्य आतिथ्यं कर्तुं सोत्साहं वर्तते।

### धर्मशालायां भारतीयदलस्य प्रभुत्वम्

धर्मशालाक्रीडाङ्गणे भारतीयदलेन अधुनावधि आहत्य पञ्च एकदिवसीयान्तरराष्ट्रीयक्रीडाः क्रीडिताः। एतेषु सङ्घर्षेषु भारतीयदलं त्रिषु विजयं प्राप्य द्वयोः पराजयं सम्मुखीकृतवत्। धर्मशालायां प्रथमः एकदिवसीयमैचः २७ जनवरी २०१३ तमे दिनाङ्के भारत-इङ्ग्लैण्डयोः मध्ये अभवत्, यस्मिन् इङ्ग्लैण्डदेशः सप्तविकेटैः विजयी अभवत्। अपरपक्षे, १७ अक्टूबर २०१४ तमे दिनाङ्के भारत-वेस्टइण्डीजदलस्य क्रीडायां भारतं ५९ धावनाङ्कैः (runs) विजयी अभवत्। तदनन्तरं १० दिसम्बर २०१७ तमे दिनाङ्के भारत-श्रीलङ्कयोः मध्ये सङ्घर्षे श्रीलङ्का सप्तविकेटैः विजयं प्राप्तवती। १६ अक्टूबर २०१६ तमे दिनाङ्के भारत-न्यूजीलैण्डयोः मध्ये क्रीडा जाता, या भारतेन जिता। २२ अक्टूबर २०२३ तमे दिनाङ्के एव भारत-न्यूजीलैण्डयोः (विश्वकप) सङ्घर्षे भारतं चतुर्भिः विकेटैः विजयं प्राप्तवान्। तथा च, धर्मशालायां अधुनावधि आहत्य नव एकदिवसीयान्तरराष्ट्रीयक्रीडाः आयोजिताः। धर्मशालायां अन्तिमः मैचः विश्वकपस्य आसीत्, यः २८ अक्टूबर २०२३ तमे दिनाङ्के न्यूजीलैण्ड-ऑस्ट्रेलियादेशयोः मध्ये क्रीडितः आसीत्।

### भारतस्य पक्षः प्रबलः

भारत-अफगानिस्तानयोः मध्ये क्रीडितानां एकदिवसीयमैचानां विषये चर्चां कुर्मः चेत्, अधुनावधि एतयोः द्वयोः दलयोः मध्ये चत्वारः एकदिवसीयान्तरराष्ट्रीयसङ्घर्षाः अभवन्, येषु भारतेन त्रिषु विजयः प्राप्तः, यदा च एकः मैचः समः (Tie) अभवत्। एतादृश्यां स्थितौ अफगानिस्तानदेशः भारतेन सह अभवेषु एकदिवसीयसङ्घर्षेषु अद्यापि एकमपि विजयं प्राप्तुं न समर्थः अभवत्।

## भगवतः इन्द्रुनागस्य द्वारं प्राप्तः 'एचपीसीए'-दलस्य (HPCA) गणः, क्रीडायाः सफल-आयोजनाय याचितः आशीर्वादः



**हिमसंस्कृतवार्ताः - धर्मशाला।** हिमाचलप्रदेशस्य रमणीये धर्मशाला-क्रीडाङ्गणे (स्टेडियम) भारत-अफगानिस्तान-देशयोः मध्ये भवितव्यात् महाद्वन्द्वात् पूर्वं पूर्व-केन्द्रीयमन्त्री तथा सासंदः अनुरागठाकुरः 'हिमाचल प्रदेश क्रिकेट एसोसिएशन' (एचपीसीए) इत्यस्य पदाधिकारिभिः सह भगवतः इन्द्रुनागस्य द्वारे शिरः नमितवान् (माथा टेका)। शनिवासरे भवितव्यस्य अस्य एकदिवसीय-क्रिकेट-क्रीडायाः शान्तिपूर्ण-सफल-आयोजनाय मन्दिरे विशिष्टा पूजा-अर्चना कृत्वा आशीर्वादः याचितः। उल्लेखनीयं वर्तते यत् इन्द्रुनागः अस्य क्षेत्रस्य मुख्यः सर्वाधिक-पूजनीयश्च देवता अस्ति, यः 'वृष्टेः देवता' इति अपि कथ्यते। यतो हि धर्मशाला-क्षेत्रे प्रायः वृष्टेः वातावरणं निर्मितं भवति, अतः क्रीडायां ऋतोः कारणात् कापि बाधा न भवेत् तथा च क्रीडा सफलतापूर्वकं पूर्णा स्यात्, इत्यस्याः एव कामनया सह समग्रेण दलेन भगवतः आशीर्वादः गृहीतः। अस्मिन् अवसरे 'एचपीसीए'-संस्थायाः उपाध्यक्षः विजयभण्डारी, सचिवः मनुजशर्मा, कोषाध्यक्षः विक्रमठाकुरः तथा अन्ये बहवः सदस्याः उपस्थिताः आसन्।'एचपीसीए'-सचिवेन मनुजशर्मणा प्रतिपादितं यत्— "एचपीसीए-क्रीडाङ्गणे क्रीडायाः सर्वाः सज्जाः अन्तिमरूपेण पूर्णाः कृताः सन्ति। सङ्घटनाय एषः अतीव गौरवस्य विषयः यत् धर्मशाला-नगरं निरन्तरं बृहत्-क्रीडानाम् आतिथ्यं प्राप्नोति। एषा एकदिवसीय-क्रीडा अपि दर्शकेभ्यः अतीव रोमाञ्चकारिणी भविष्यति।" अपरतः, पूर्व-केन्द्रीयमन्त्रिणा सांसदेन च अनुरागठाकुरेण प्रोक्तं यत्— "धर्मशाला-क्रिकेट-क्रीडाङ्गणेन हिमाचलप्रदेशाय अन्ताराष्ट्रियस्तरे एकः नवीनः परिचयः प्रदत्तः। एताभिः क्रीडाभिः स्थानीय-जनेभ्यः रोजगारस्य नवीनाः अवसराः प्राप्ताः तथा च प्रदेशस्य पर्यटन-उद्योगाय अपि प्रोत्साहनं मिलितम् अस्ति। विश्वस्तरीय-व्यवस्थाभिः सह 'एचपीसीए' निरन्तरं श्रेष्ठं कार्यं करोति।"

# मोदी-सर्वकारस्य द्वादशवर्षेषु हिमाचलाय प्राप्ता विकासस्य नवीना गतिः- जगत प्रकाश नड्डा






**हिमसंस्कृतवार्ताः- शिमलाः।** भारतीयजनतापक्षेण आयोजितस्य 'विश्वासस्य, विकासस्य, जनकल्याणस्य च द्वादश वर्षाणि' इति राष्ट्रिय- अभियानस्य अन्तर्गतं हिमाचलप्रदेशस्य राजधान्यां शिमलानगरे एकः विशालः बुद्धिजीविसमारोहः आयोजितः आसीत्। अस्मिन् बुद्धिजीवि-सम्मेलने भागं गृह्णन् केन्द्रीयस्वास्थ्य-परिवारकल्याण- रसायन- उर्वरकमन्त्री, भाजपा-पक्षस्य पूर्वराष्ट्रीयाध्यक्षः जगतप्रकाश नड्डा प्रधानमन्त्रिणः नरेन्द्रमोदिनः कुशलनेतृत्वयुक्तस्य केन्द्रसर्वकारस्य गतानि द्वादश वर्षाणि भारतवर्षस्य सुदीर्घ-इतिहासस्य एकं 'स्वर्णिमयुगम्' इति रूपेण वर्णितवान्। सः दृढतापूर्वकं अवदत् यत् एतानि द्वादश वर्षाणि न केवलं साधारणाः कार्यकालाः आसन्, अपि तु एषः कालखण्डः 'विकसितभारतस्य' सुदृढां अभेद्यां च आधारशिलां स्थापयितुं एकं युगान्तरकारी परिवर्तनकारी च पर्व आसीत्। तेन विशेषरूपेण उल्लिखितं यत् एतेषु द्वादशसु वर्षेषु हिमाचलप्रदेशाय विकासस्य एका नवीना, अतीव तीव्रा च गतिः प्राप्ता अस्ति, यस्य फलस्वरूपं विशेषतः मार्ग-निर्माणं, स्वास्थ्य-सेवा, आधुनिक- आधारभूतसंरचनानां च क्षेत्रेषु अभूतपूर्वाः ऐतिहासिक्यः च प्रगतयः अभवन्।

**हिमाचलस्य परिवर्तितं चित्रम्-** ऐम्स (AIIMS), चिकित्साविद्युत्पीठाः, राष्ट्रियमार्गाणां च निर्माणम्

भाषणप्रसङ्गे जगत् प्रकाश नड्डा अस्मिन् प्रमुखे विषये विशेषं बलं दत्तवान् यत् बिलासपुर-नगरे अखिलभारतीय-आयुर्विज्ञानसंस्थानस्य (AIIMS) स्थापना, राज्यस्य विभिन्नेषु भागेषु नवीनानां सर्वकारीय-चिकित्साविद्युत्पीठानां सुदृढीकरणं, समग्रप्रदेशे विस्तीर्णानां राष्ट्रियमार्गाणां जालवत् निर्माणं हिमाचलप्रदेशस्य भौगोलिकं सामाजिकं च चित्रं पूर्णतया परिवर्तितवन्तः। सः स्पष्टीकृतवान् यत् एताभिः विशालपरियोजनाभिः न केवलं राज्यस्य आन्तरिकस्वास्थ्यव्यवस्था सुदृढा सुलभ च जाता, अपि तु आवागमनस्य क्षेत्रे अपि एतादृशः अभूतपूर्वः सुधारः अभवत्, येन कारणेन प्रदेशस्य सुदूर-दुर्गेषु दुर्गमेषु च पर्वतीयक्षेत्रेषु अपि विकासस्य सुफलं प्रत्यक्षं प्राप्तं सञ्जातम्।

## लक्षशः परिवाराणां जीवने सकारात्मकं परिवर्तनम्-

जलजीवनमिशनं, उज्ज्वला, प्रधानमन्त्री आवासयोजना च केन्द्रीयमन्त्रिणा नड्डेन सर्वकारस्य लोककल्याणकारी- नीतीनां चर्चां कुर्वता कथितं यत् जलजीवनमिशनं, उज्ज्वला- योजना, प्रधानमन्त्री आवासयोजना इत्यादीनां क्रान्तिकारि-जनकल्याणकारीयोजनानां प्रभावेण हिमाचलप्रदेशस्य लक्षशः निर्धन- मध्यमवर्गीय- परिवाराणां दैनन्दिनजीवने अतीव सकारात्मकं गुणात्मकं च परिवर्तनं संलक्षितम्। एतासाम् योजनानां विवरणं ददत् सः प्रावोचत् यत्- जलजीवनमिशनम्: एतया योजनया ग्रामीण- पर्वतीयक्षेत्रेषु प्रत्येकं गृहं प्रति शुद्धपेयजलस्य उपलब्धता निरन्तरं निश्चिता कृता, येन महिलानां कष्टपूर्णं जीवनं सरलं जातम्। उज्ज्वलायोजनाः निर्धनमहिलाभ्यः निःशुल्कं पाकगैस-संयोगं प्रदाय ताः पारम्परिकचुल्याः क्षतिकारकात् धूमात् सर्वथा मुक्ताः कृताः, येन तासां स्वास्थ्यरक्षा अभवत्। प्रधानमन्त्री आवासयोजनाः एतस्याः योजनायाः अन्तर्गतं देशस्य कोटिशः, हिमाचलस्य सहस्रशः निर्धनपरिवारेभ्यः सुरक्षितं सुदृढं च पक्वेष्टिकाभिः निर्मितं गृहम् उपलब्धं कारितम्। हिमाचलप्रदेशे अपि एतासां सर्वसाधारणयोजनानां बलेन विपुलसङ्ख्यायां नागरिकाः लाभान्विताः अभवन्।

## विकसितभारतस्य सुदृढा आधारशिला द्वादशवर्षाणां स्वर्णिमः कार्यकालः

केन्द्रीयमन्त्रिणा गौरवेण सह कथितं यत् आदरणीयेन प्रधानमन्त्रिणा नरेन्द्रमोदिना निरन्तरं ४३९९ दिनानि यावत् अहर्निशं देशस्य 'प्रधानसेवकत्वेन' निष्कामभावेन कार्यकरणं राजनैतिक-इतिहासे एकं नवीनं सुदृढं च कीर्तिमानं वर्तते। एषः दीर्घकालखण्डः भारतस्य १४० कोटि- जनसङ्ख्यायाः अटूटविश्वासस्य प्रत्यक्षं प्रतीकम् अस्ति। सः अग्रे अवदत् यत् यदा देशः स्वकीय-स्वतन्त्रतायाः ७५ वर्षाणि पूर्णानि कृत्वा 'अमृतकाले' प्रवेशं कृतवान्, तदा प्रधानमन्त्रिणा मोदिना वर्षं २०४७ यावत् भारतं पूर्णरूपेण 'विकसितराष्ट्रं' विधातुम् यः महासङ्कल्पः कृतः, तस्य सङ्कल्पस्य सुदृढा आधारशिला गतेषु १२ वर्षेषु एव सुशासनेन स्थापिता अस्ति।

### राजनैतिकसंस्कृतौ परिवर्तनं जनविश्वासस्य सुदृढता च

राजनैतिकपरिवर्तनस्य उपरि प्रकाशं क्षिपन् नड्डः अवदत् यत् वर्षे २०१४ तः पूर्वं देशस्य सम्पूर्णं राजनीतिः जातिवादेन, घोर-परिवारवादेन, अनुचितेन तुष्टीकरणेन, व्यापकभ्रष्टाचारेण च ग्रस्ता आसीत्, येन देशस्य विकासः अवरुद्धः आसीत्। परन्तु प्रधानमन्त्री नरेन्द्र मोदी एतां सङ्कुचितां धारणां समूलं परिवर्तयन् राजनीतिं 'सेवा, सुशासनम्, उत्तरदायित्वं च' इति त्रिसूत्र्याः पवित्रं माध्यमं अकरोत्। सः सर्वकारस्य मूलमन्त्रस्य "सबका साथ, सबका विकास, सबका विश्वास, सबका प्रयास" इति उल्लेखं कुर्वन् गौरवम् अन्वभवत् यत् अद्य मोदी-सर्वकारः कस्यापि वर्गस्य भेदं न कृत्वा १४० कोटिभारतीयानां कल्याणाय कटिबद्धः भूत्वा कार्यं करोति।

### ऐतिहासिकाः निर्णयाः जनतायाः अटूटः विश्वासः च

तेन गतेषु वर्षेषु सर्वकारेण गृहीतानां देशहितकारिणां साहसिकनिर्णयानां श्लाघा कृता, यत्र प्रमुखाः सन्ति- जम्मू-काश्मीर-राज्यात् संवैधानिक- धारा-३७० इत्यस्याः पूर्णतया निष्कासनं कृत्वा तत्र राष्ट्रिय-एकतायाः सुदृढीकरणम्। अयोध्यायां सांस्कृतिक-पुनर्जागरणस्य प्रतीकरूपेण भव्यस्य श्रीराममन्दिरस्य निर्माणम्। मुस्लिममहिलानां सामाजिकसुरक्षायै 'त्रितलाक' सदृश्याः कुप्रथायाः कानुनीसमाप्तिः। 'नागरिकता- संशोधन- अधिनियमः' इति ऐतिहासिक-निर्णयस्य प्रख्यापनम्। एते सर्वविदिताः निर्णयाः देशस्य भविष्यं नवदिशं प्रति नीतवन्तः। नड्डः अवदत् यत् एतस्य एव निरन्तरविकासस्य, सुशासनस्य, व्यापक-जनकल्याणस्य च बलेन भारतीयजनतापक्षाय राष्ट्रस्य जनताभिः निरन्तरं तृतीयवारं पूर्णबहुमतेन सह शासनस्य सुवर्ण- अवसरः (आशीर्वादः) प्रदत्तः, यः प्रधानमन्त्रिणः मोदिनः दृढनेतृत्वे जनहितकारीनीतिषु च देशस्य जनसामान्यस्य प्रगाढविश्वासस्य अकाट्यं प्रमाणं सिद्धं करोति।

### आधारभूतसंरचना, स्वास्थ्यं, रक्षा, तन्त्रज्ञानं च-

एतेषु नवीनानि कीर्तिमानानि गतेषु द्वादशसु वर्षेषु देशस्य आधारभूतसंरचनायां या क्रान्तिः आगता, तस्याः विवरणं यच्छन् सः भारतीयरेलमार्गस्य विद्युतीकरणे अभूतपूर्वां २००% वृद्धिं, पर्वतीयराज्ये हिमाचलप्रदेशे च शतप्रतिशतं (१००%) विद्युतीकरणस्य लक्ष्यप्राप्तिं सस्मार। राष्ट्रियमार्गैः, विश्वस्तरीय-सुरङ्गाभिः (यथा अटल-सुरङ्गा), चतुष्पथपरियोजनाभिः, आधुनिकपरिवहनतन्त्रैः च देशस्य भौगोलिकं स्वरूपं सर्वथा नवीनं जातम्।

**स्वास्थ्यक्षेत्रम्**: स्वास्थ्यक्षेत्रे पुरा स्थितानां ३७६ चिकित्साविद्युत्पीठानां सङ्ख्या वर्धित्वा अधुना ८२० तः अपि अधिका जाता अस्ति। एतस्मिन् गौरवास्पदप्रसङ्गे हिमाचलस्य चम्बा, हमीरपुर, नाहन इत्यादिषु जनपदेषु नवीनानां चिकित्सा- विद्युत्पीठानां स्थापना तथा बिलासपुर-नगरे 'ऐम्स' महती संस्था देशाय अपूर्वा सौगात अस्ति।

**रक्षाक्षेत्रम्**: रक्षाक्षेत्रे भारतेन 'आत्मनिर्भरता' प्राप्ता, रक्षासामग्रीणाम् निर्याते ५७००% विपुला वृद्धिः सञ्जाता, या भारतस्य सामरिकशक्तेः परिचायिका अस्ति।

**तन्त्रज्ञानम्**-विज्ञान-तन्त्रज्ञानस्य क्षेत्रे 'चन्द्रयान-३' इत्यस्य चन्द्रस्य दक्षिणध्रुवे ऐतिहासिकं साफल्यं, 'गगनयान' अन्तरिक्ष-अभियानस्य तीव्रा सज्जता, 'डिजिटल इण्डिया' इत्यस्य क्रान्तिः, स्वदेशनिर्मिताः गतिशालिन्यः 'वन्दे भारत' रेलाः, अत्याधुनिक-विमानपत्तनानां निर्माणं तथा च ग्रामं ग्रामं प्रति प्रसारितं 'ऑप्टिकल फाइबर नेटवर्क' एतानि सर्वाणि तत्त्वानि वैश्विकमञ्चे भारतस्य नवीनस्य, दृढस्य, स्वावलम्बिनः च आत्मविश्वासस्य ज्वलन्तः परिचायकानि सन्ति।

# सुन्दरनगरसंस्कृतमहाविद्यालयस्य छात्रद्वयस्य भारतीयसेनायां चयनम्



**हिमसंस्कृतवार्ताः-**शताधिकवर्षपुरातनेन सुन्दरनगर- राजकीय- संस्कृत- महालिद्यालयेन यद्यपि नैका उपलब्धयः प्राप्ताः तथापि महाविद्यालयस्य प्राचार्येण डॉ. खुशवन्तसिंहवर्येण ज्ञापितं यत् सद्य एव महाविद्यालयस्य छात्रद्वयस्य भारतीयसेनायाः अग्निवीर- योजनायां चयनमभवत्। महोदयेनोक्तं यत् एतौ कर्मठच्छात्रौ अजयकुमारः साहिलश्च सद्य एव महाविद्यालयात् स्नातककक्षामुत्तीर्णवन्तौ। इदानीं तयोः भारतीयसेनायां चयनमभवदिति महतः प्रमोदस्य विषयः। अनयोरियमुपलब्धिः अन्येषां छात्राणाङ्कतेऽपि प्रेरिकास्ति। अद्य महाविद्यालये अनयोः छात्रयोः विशेषसम्मानं जातम्। सर्वेऽपि महाविद्यालयप्राध्यापकाः प्राध्यापिकाः, कर्मचारिणश्च एतौ वर्धापनार्हौ कर्मठच्छात्रावभिनन्दितवन्तः।

# हिमाचलस्य ७४ 'पीएम श्री' विद्यालयेषु मुक्तव्यायामशालाः निर्मास्यन्ते, अध्ययनेन सह स्वास्थ्ये अपि ध्यानं दास्यन्ति छात्राः



**हिमसंस्कृतवार्ताः -शिमला।** समग्र-शिक्षा-अभियानं प्रदेशस्य विद्यालयीय-छात्रेभ्यः गुणात्मिकां शिक्षां प्रदानेन सहैव तेषां शारीरिक-मानसिक-स्वास्थ्यमपि समानेन रूपेण महत्त्वं ददाति। इमामेव विचारधारां अग्रे नेतुं प्रदेशस्य 'पीएम श्री' विद्यालयेषु मुक्त-व्यायामशालाः ('ओपन जिम') स्थापयितुं प्रवृत्तिः आरब्धा। प्रथमे चरणे राज्यस्य ७४ 'पीएम श्री' विद्यालयेषु प्रायः २७०.१० लक्ष रूप्यकाणां व्ययेन मुक्त-व्यायामशालाः निर्मास्यन्ते। एतदतिरिच्य १४ कस्तूरबा गान्धी बालिका विद्यालयेषु (KGBV) अपि प्रायः ७० लक्ष रूप्यकाणां व्ययेन मुक्त-व्यायामशालाः स्थाप्यन्ते, येन छात्राः विद्यालय-परिसरे एव आधुनिकानां स्वास्थ्य-सुविधानां लाभं प्राप्तुं शक्नुयुः। एषा प्रवृत्तिः छात्रान् नियमित-शारीरिक-गतिविधिभिः सह संयोजयितुं, स्वस्थ-जीवनशैल्याः प्रोत्साहनाय तथा विद्यालयेषु स्वास्थ्यं प्रति सकारात्मकं वातावरणं विकसितुं दिशि एकः महत्त्वपूर्णः प्रयासः वर्तते। समग्र-शिक्षायाः उद्देश्यं विद्यालयेषु एतादृशं समावेशि प्रेरणादायि च वातावरणं सज्जीकर्तुं वर्तते, यत्र छात्राणां ज्ञानस्य, व्यक्तित्वस्य, स्वास्थ्यस्य, जीवन-कौशलस्य च सन्तुलितः विकासः सुनिश्चितः भवेत्। मुक्त-व्यायामशालायाः स्थापना अस्याः एव व्यापक-चिन्तनस्य भागः अस्ति, येन छात्रेभ्यः विद्यालय-परिसरे एव व्यायामस्य स्वास्थ्य-गतिविधीनां च श्रेष्ठाः अवसराः उपलब्ध्याः भविष्यन्ति। समग्र-शिक्षा-निदेशकः राजेशशर्मा अवदत् यत्— "स्वस्थे शरीरे एव स्वस्थ-मनसः विकासः सम्भवः अस्ति। इममेव दृष्टिकोणं ध्याने निधाय 'पीएम श्री' विद्यालयेषु कस्तूरबा गान्धी बालिका विद्यालयेषु च मुक्त-व्यायामशालाः' स्थाप्यन्ते।" तेन कथितं यत् एषा प्रवृत्तिः छात्र-छात्राणां सर्वाङ्गीण-विकासस्य दिशि एकं महत्त्वपूर्णं पदं वर्तते। अनेन बालेषु स्वास्थ्यं (फिटनेस), अनुशासनं, स्वस्थ-जीवनशैल्याः स्वभावश्च विकसितः भविष्यति, यः तेषाम् उज्ज्वल-भविष्यस्य सुदृढाम् आधारशिलां निर्मास्यति।

## बालानां सर्वाङ्गीण-विकासः प्राप्नोति सुदृढताम्

समग्र-शिक्षायाः एषा प्रवृत्तिः छात्राणां सर्वाङ्गीण-विकासस्य अवधारणां अत्यधिकं सुदृढां करोति। विद्यालयेषु उपलब्धाः मुक्त-व्यायामशाला-सुविधाः बालान् नियमितरूपेण व्यायामं कर्तुं प्रेरयिष्यन्ति, येन तेषु स्वास्थ्यं प्रति जागरूकता वर्धिष्यते तथा क्रीडा-गतिविधिषु तेषां सहभागित्वापि प्रोत्साहनं लप्स्यते। नियमित-व्यायामेन बालानां शारीरिक-क्षमता, सहनशक्तिः, रोग-प्रतिरोधक-क्षमता च वर्धते। अनेन सहैव एतत् अवसाद-न्यूनीकरणे, एकाग्रता-वर्धने तथा मानसिक-स्वास्थ्यस्य परिष्करणे अपि प्रमुखां भूमिकां निर्वहेत्।

## शारीरिक-गतिविधिभिः संयोक्तुं शक्ष्यन्ति बालाः

'मुक्त-व्यायामशाला' इत्यस्य उपयोगेन छात्र-छात्राः नियमित-शारीरिक-गतिविधिभिः सह संयोक्तुं शक्ष्यन्ति, येन तेषु आत्मविश्वासः, अनुशासनम्, दल-भावना (टीम भावना) सकारातमकी च चिन्ता विकसिता भविष्यति। विद्यालय-परिसरे उपलब्ध्याः एताः सुविधाः बालेषु न्यून-वयसि एव स्वास्थ्यस्य स्वभावं विकसितुं साहाय्यं करिष्यन्ति तथा तान् स्वस्थाम् सक्रियाम् च जीवनशैलीम् अङ्गीकर्तुं प्रेरयिष्यन्ति।

# ग्रामीण-अर्थव्यवस्थायाः सुदृढीकरणम्, पशुपालकेभ्यः प्राप्स्यते वैज्ञानिक-प्रबन्धनम् - मुख्यमंत्री सुक्खूः



**हिमसंस्कृतवार्ताः -शिमला।** हिमाचलप्रदेशसर्वकारेण पशुपालकानाम् आजीविकां सुदृढीकर्तुं 'हिमाचल प्रदेश चराई नीति-२०२६' (तृणाश-नीतिः) इत्यस्यै स्वीकृतिः प्रत्ता। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः नेतृत्वे एषा नीतिः सज्जीकृता अस्ति। अस्याः उद्देश्यं तृणाश-प्रबन्धनं (चराई प्रबंधन) अत्यधिकं वैज्ञानिकं, पारदर्शिनं, पर्यावरण-अनुकूलं च विधातुं वर्तते। एषा ग्रामीण-अर्थव्यवस्थायाः कृते अपि सुदृढ़तां प्रदास्यति। मुख्यमन्त्रिणा प्रतिपादितं यत् नूतना नीतिः पारम्परिक-प्रतिबन्धात्मक-व्यवस्थायाः स्थाने शिथिलं (लचीला) वैज्ञानिकं च दृष्टिकोणं स्वीकरिष्यति। सर्वकारस्य मतं वर्तते यत् उत्तरदायित्वपूर्ण-तृणाशेन तृणभूम्याः (घास वाली जमीन) उत्पादकता वर्धिष्यते। अनेन भूमौ कार्बन्-सञ्चयनस्य (कार्बन भंडारण) प्रोत्साहनं प्राप्स्यते तथा जैवविविधता-संरक्षणम् अपि सुदृढं भविष्यति। वनविभागः, पशुपालनविभागस्य सहयोगेन एकं व्यापकं ऑनलाइन-पटल-माध्यमं (Online portal) विकसितं करिष्यति। आगामि-षण्मासाभ्यन्तरे पशुपालकैः स्व-नाम, सङ्केतः (पता), पशूनां सङ्ख्या तथा पारम्परिक-भ्रमण-मार्गाणां पञ्जीकरणं करणीयम् भविष्यति। एषा प्रणाली 'हिम परिवार' तथा 'भारत पशुधन पटल' इत्यनेन सह सम्बद्धा भविष्यति। अनेन पशुपालकानां विवरणानां सत्यापनं सारल्येन भवितुं शक्ष्यति। सर्वकारेण प्रथमतया तेषाम् पारम्परिक-पशुपालकानामपि औपचारिक-मान्यता प्रदातुं निर्णयः स्वीकृतः, ये सुदीर्घवर्षेभ्यः अनुमतिं विना एव चारण-कार्ये संलग्नाः आसन्। पञ्जीकरणानन्तरं ते परामर्शदाता-समितीनां सम्मुखं स्व-पक्षान् उपस्थाप्य नूतनानि अनुमति-पत्राणि (परमिट) प्राप्तुं शक्ष्यन्ति।

## वैज्ञानिक-आकलनं प्रबन्धनं च

नूतन-तृणाश-अनुमति-पत्रस्य निर्गमनात् पूर्वं चारणभूमीनाम् उपलब्धेः वैज्ञानिकम् आकलनं विधास्यते। अस्मिन् वनक्षेत्राणां वहनक्षमता, वन्यजीवानाम् आवश्यकताः तथा स्थानीय-समुदायानाम् पारम्परिकाः अधिकाराः प्रेक्षिष्यन्ते। वनक्षेत्राणां संरक्षणाय पुनरुज्जीवनाय च क्रमबद्धा तृणाश-व्यवस्था प्रवर्तिता भविष्यति। तृणाश-परामर्शदाता-समितिषु स्थानीय-प्रवासी-पशुपालकाः, पञ्चायत-प्रतिनिधयः, विशेषज्ञाः तथा ऊर्ण-सङ्घस्य (ऊन संघ) प्रतिप्रनिधयः समाविष्टाः करिष्यन्ते। वनसंरक्षकस्य जनपद-वनाधिकारिणः च अध्यक्षतायाम् एताः समितयः प्रत्येकं पञ्चसु वर्षेषु अनुमति-पत्राणां (परमिटों की) समीक्षां करिष्यन्ति।

## पशुचारकाणां संरक्षणं भविष्यं च

नीत्यां पारम्परिक-पशुचारकाणाम्, यान् 'पोहाल' इति उच्यते, तेषां सुरक्षायाः आजीविका-संरक्षणस्य च प्रावधानं वर्तते। पारम्परिक-प्रवासी-मार्गाणां, जलस्रोतासां, विश्रामस्थलाणां च विशिष्टं मानचित्रणं 'जियो-टैगिंग्' (Geo-tagging) च विधास्यते। सप्तवर्षेभ्यः अधिक-पुरातन-वनरोपण-क्षेत्रेषु नियन्त्रित-तृणाशस्य अनुमतिः अपि प्रदास्यते। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना प्रोक्तं यत् एषा नीतिः हरितिमा अपि, समृद्धिः अपि राज्यस्य '(हरियाली भी, खुशहाली भी') इति अवधारणां साक्षात् करिष्यति। तेन कथितं यत् एषा प्रवृत्तिः पर्यावरण-संरक्षणस्य ग्रामीण-समृद्धेः च मध्ये सन्तुलनं स्थापयन्ती पशुपालन-अर्थव्यवस्थायाःआधारशिलां स्थापयिष्यति।



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमो नमः नन्दिनि। अद्य बह्व्यः अद्भुताः वार्ताः सन्ति। प्रथमा वार्ता- विमानपत्तने केनचित् चतुर्वर्षीयेन बालकेन स्वस्य प्रियं भल्लूक- क्रीडनकं हारितम्।

**नन्दिनी-** कष्टकरम् एतत्। किन्तु विमान- कर्मचारिभिः तत् पुनः प्राप्तम्, तत् श्रुत्वा मम मनः प्रसन्नं जातम्।

**काव्या-** सत्यम्। बालकाय सुखं दत्तं तैः। द्वितीया वार्ता उत्तरप्रदेशात् अस्ति। तत्र केनचित् वरेण विवाह-यात्रायां धराभीमम् आरुह्य नृत्यं कृतम्!

**नन्दिनी-** कियत् विचित्रम्! विवाह-यात्रायां धराभीमस्य उपयोगः इतः पूर्वं न श्रुतः। इदानीं तृतीया वार्ता बेङ्गलूरु-नगरस्य केनचित् अभियन्त्रा पर्यावरण-रक्षणाय कन्याकुमारीतः काश्मीरं यावत् पदयात्रा आरब्धा अस्ति।

**काव्या-** तस्य सङ्कल्पः तु श्लाघनीयः। एतादृशी पदयात्रा बहुभिः न कृता। अन्तिमा वार्ता गया-नगरतः अस्ति। तत्र पक्षिभ्यः आहारं जलं च दातुं पिता-पुत्राभ्यां प्रतिमासं पञ्चविंशतिसहस्रं रूप्यकाणि व्ययितानि।

**नन्दिनी-** अहो औदार्यम्! उष्णकाले पक्षिणां सेवा ताभ्यां सम्यग्रूपेण कृता। अद्यतनी वार्ता एतावती एव। धन्यवादः।

**काव्या-** पुनर्मेलिष्यामः।

## ।।लौकिकन्यायकोशः।।

## ।।अधिकारन्यायः।।

यज्ञकर्तुः के गुणाः आवश्यकाः? तस्य कीदृशी योग्यता अपेक्षिता? इत्यादि- विषये केचन नियमाः शास्त्रे कथिताः। अधिकारस्य अर्थात् योग्यतायाः विषये नियमाः यत्र कथिताः तत्र कस्य न्यायस्य प्रयोगः भवति। मीमांसाशास्त्रे अस्य विवेचनम् उपलभ्यते यथा-

***"किञ्चित् पुरुषविशेषणत्वेन अश्रुतमपि अधिकारिविशेषणं भवति।***

***यथाध्ययनसिद्धा विद्या अग्रिसा ध्येषु कर्मसु आधानसिद्धाग्निमत्वं सामर्थ्यं च।***

(मीमांसान्यायप्रकाशः)

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**